**Kalika Prabha : Journal of Multidisciplinary Studies**
[ISSN:- 3021-9388 (Print)]
Published by Kalika Sanskrit Vidyapeeth (RMC) Nawalpur, Nepal
https//www.ksv.edu.np

# बौद्धदर्शने प्रतिपादितस्यार्यसत्यचतुष्टयस्य विवेचनम्

**राजनारायणठाकुरः (विद्यावारिधिः)**
*उपप्राध्यापकः, बौद्धदर्शनम्, ने.सं.वि., वाल्मीकिविद्यापीठम्*

***Article History :*** *Received : 26th, Jan. 2026; Reviewed: 8th, March 2026; Accepted: 10th; June, 2026*
***Corresponding Author*** *: Rajnarayan Thakur, PhD* ***E-mail :*** *rajnarayanthakur8@gmail.com*
***DOI :*** *https://doi.org/10.3126/kp.v4i1.97051*

## सारः

*बौद्धवाङ्मये सिद्धान्तबाहुल्यं समुपलभ्यते। तत्र सत्यचतुष्टयस्य राद्धान्तोऽन्यतमोऽस्ति। बौद्धदर्शनेऽस्य महनीयं स्थानं दरीदृश्यते। गूढमिदं सत्यचतुष्टयं बौद्धदर्शनस्य मूलमेव। बौद्धमते दुःखस्वरूपं निखिलं जगत्। तत्कारणन्तु तृष्णैवास्ति। तृष्णायाः प्रहाणमपि भवितुमर्हति। तदर्थमष्टाङ्गिको मार्गोऽपि तथागतेन प्रदर्शितोऽस्ति। यस्याष्टाङ्गिकमार्गस्याचरणेन तृष्णावसीयते, सर्वावरणविनिर्मुक्तं निर्वाणं जायते च। एवमेव सांसारिकदुःखाद् विमोचनं निर्वाणतत्त्वस्य प्रापणमेव सत्यचतुष्टयस्य मूलमुद्देश्यमिति निश्चप्रचम्।*

**शब्दकुञ्जी**— आर्यसत्यानि, तृष्णा, अविद्या, क्लेशाः, दुःखनिरोधः।

## विषयपरिचयः

पौरस्त्यदर्शनेषु बौद्धदर्शनस्य महनीयं स्थानं वेविद्यते। प्रवर्तकोऽस्य महात्मा बुद्धो बभूव। बुद्धनये दुःखमयं चराचरं सर्वम्। अत एवानेन जागतिकान् दुःखनिमग्नान् जीवान् सर्वान् समुद्धर्तुं चत्वार्यार्यसत्यानि समुपदिष्टानि सन्ति। आर्यसत्यान्येतानि न केवलं बौद्धदर्शनस्य मूलान्यपि तु निर्वाणलाभाय मुख्यसाधनानि मन्यन्ते। तानि चत्वार्यार्यसत्यानि सन्ति– दुःखम्, दुःखसमुदयः, दुःखनिरोधः, दुःखनिरोधमार्गश्चेति। बुद्धोपदेशेषु सत्यचतुष्टयमेव प्रामुख्यं भजते। एतदाश्रित्यैव बौद्धाः सर्वं बौद्धसिद्धान्तसिद्धमाचारविचारादिकं सम्पादयन्ति व्यवस्थापयन्ति च। अस्य यथार्थज्ञानं विना न कोऽपि बौद्धदर्शनस्य ज्ञाता भवितुं नार्हति। अत एव सुप्रसिद्धैर्बौद्धाचार्यैः स्वस्वग्रन्थेषु सस्वरूपं सत्यचतुष्टयमिदं बहुधा प्रतिपादि–तम्। मानवजीवनेऽस्य ज्ञानमपरिहार्यं वर्तते। तेनात्र बौद्धदर्शनमाधृत्य सत्यचतुष्टयस्य विवेचनात्मकमध्ययनं कृतं विद्यते।

## प्रयोजनम्

बौद्धदर्शने प्रतिपादितस्य सत्यचतुष्टयस्य रहस्योद्घाटनपूर्वकं तदनुप्राणितदर्शनस्य विशेषज्ञानप्राप्तिश्च लेखस्यास्य प्रयोजनं वर्तते।

## समस्या

बौद्धानां प्रमुखराद्धान्तेष्वन्यतममस्ति सत्यचतुष्टयम्। अधुनाप्यस्य बौद्धदर्शनेष्वध्ययनमध्यापनं चिन्तनं मननं विहितमेव विद्वद्भिः। किञ्च बौद्धदर्शन उच्चैस्तरां महत्त्वाधायकस्याप्यस्य सत्यचतुष्टयस्य विकीर्णविषयसन्दर्भमेकीकृत्य सूक्ष्मेक्षिकया समीक्षणेनैकत्रीकरणमप्यद्यावधि न कैश्चिद् विहितमिति तदनुपलब्धिर्ह्यस्य लेखस्य पुरतो महती समस्या। तस्मादस्याभावस्य परिपूर्तये लेखेऽस्मिन् सत्यचतुष्टयस्य विशेषानुशीलनं विशेषप्रतिपादनञ्च क्रियते। बौद्धदर्शने प्रतिपादितस्यार्यसत्यचतुष्टयस्य विवेचनमिति शीर्षकमधिकृत्य कृतेऽस्मिँल्लेखे समस्ये द्वे विद्येते।

(१) बौद्धनये दुःखस्वरूपं किम् ? किं सर्वेषां क्लेशानां मूलं तृष्णैवास्ति ?

(२) तृष्णाक्षयात् किं सञ्जायते ? तृष्णाक्षयस्योपायः कः ?

## उद्देश्यम्

(१) बौद्धमतानुसारेण दुःखस्वरूपस्य निर्धारणम् , तदनुसारेण समेषां क्लेशानामाश्रयस्तृष्णेत्यस्य विवेचनम्।

(२) तृष्णाक्षयादेव निर्वाणं प्राप्यत इति प्रतिपादनपूर्वकमष्टाङ्गिकमार्ग एव तृष्णाप्रहाणस्योपाय इति विवेचनम्।

## अध्ययनविधिः

अस्य लेखस्योपस्थापने सामग्रीसङ्कलनाय पुस्तकालयकार्यं प्राधान्येनानुसृतम्। तत्र त्रिपिटकग्रन्थाः प्राथमिकस्रोतसामग्रीरूपेण गृहीताः, तथा चाभिधर्मकोशादिग्रन्था द्वितीयस्रोतःसामग्रीरूपेण समाश्रिताः। सर्वाश्चैताः सामग्र्यः पुस्तकालयेभ्यः, विद्युत्सञ्जालादपि सङ्गृहीताः सन्ति। तास्ताः सामग्रीः समुपयुज्य विवेचनात्मको विश्लेषणात्मकश्च विधिः समाश्रितोऽस्ति। अत्र गर्भटिप्पण्यां सन्दर्भसूच्याञ्चैकरूपतायै सर्वत्र एपिएपद्धतिरेव गृहीता विद्यते। पूर्वोक्तविधिभिरेवात्रार्यसत्यचतुष्टयस्य रहस्यं वैशिष्ट्यञ्च प्रकटितं वर्तते।

## सैद्धान्तिकपर्याधारः

महात्मा बुद्धो बभूव बौद्धदर्शनस्य प्रवर्तकः। तन्नये दुःखमयं केवलं जगदिदम्। कथं वा जागतिकान् दुःखान् मुक्तिरिति स भृशं चिन्तयाञ्चकार। अनन्तरमसौ महत् कठिनं तपश्चकार। तादृशकठिनतमतपोबलप्रभावेणायं बुद्धत्वं प्राप। ततः परं वाराणस्यां सारनाथनाम्नि स्थानेऽनेन स्वशिष्येभ्यः सत्यचतुष्टयं समुपदिष्टम्। किञ्च दुःखम्, कथमुत्पद्यते हीदम्, किमस्यावसानम्, विनश्यतीदं कथमित्येतानि सत्यचतुष्टयानि तेन प्रकाशितानि। एतावता जागतिकदुःखस्य महान् ज्ञाता महात्मा बुद्धो दुःखं तदीयं कारणं तन्निरोधो मार्गश्चेति बहुमूल्यं तत्त्वं लोके प्रसार्य महज्जनकल्याणं प्रसाधितवान्।

अत्र बुद्धोपदिष्टानां सत्यचतुष्टयप्रतिपादकानामभिधर्मकोशादिग्रन्थानां यथायथमध्ययनं विधाय पूर्वोक्तस्य सत्यचतुष्टयस्य स्वरूपमुपदर्शितमस्ति। अस्मिँल्लेखे विवेचनात्मकविश्लेषणात्मकादीनामध्ययनविधीनां सैद्धान्तिकाधारेण सत्यचतुष्टयस्य यथार्थनिरूपणं विहितमस्ति।

## विश्लेषणपरिणामः

प्रथमं तावदत्र सत्यचतुष्टयस्य प्रतिपादनार्थं विनयपिटकादारभ्य प्रमाणवार्तिकादिबौद्धसिद्धान्त–प्रतिपादकेषु ग्रन्थेषु सत्यचतुष्टयसम्बद्धानां विषयाणामध्ययनं कृतमस्ति। विविधानां सत्यचतुष्टयसम्बद्धानां ग्रन्थानामाधारेण शीर्षकसम्बद्धानां दुःखस्वरूपादिविषयाणामत्र व्याख्या विवेचना च विहितास्ति। एवमेवोपर्युक्तानां विषयाणां विश्लेषणादिविधीनामाधारेण विश्लेषणं विधाय सत्यचतुष्टयस्य रहस्यं समुद्घाटितं वर्तते।

### आर्यसत्यशब्दव्युत्पत्तिः

सते हितं सत्यमविपरीतमित्यर्थः। अर्थादविपरीतवस्तुतत्त्वमेव सत्यं प्रोच्यते। सन्दर्भेऽस्मिन् विशुद्धिमग्गो इत्याख्ये पालिग्रन्थे यथोल्लिखितं वर्तते— यस्मा पनेतानि बुद्धादयो अरिया पटिबिज्झन्ति, तस्मा अरिसच्चानीति। ... अविसंवादकानीति अत्थो (बुद्धघोषः, २००९ : पृ.३४६)। अर्थादार्याणां बुद्धादीनां ज्ञानदृष्ट्या सत्यानीत्यार्यसत्यानि। एतेषां सत्यानां प्रतिवेधज्ञानेनार्यत्वसिद्धेः, आर्यकरधर्मत्वाद् वा आर्यसत्यानि। आर्याणि तथ्यानि अवितथानि अविसंवादविषयाणि सत्यानीति वा आर्यसत्यानि। विषयेऽस्मिन् यथोक्तमभिधर्मकोशकारेण— आर्यसत्यानीति सूत्र उच्यन्ते। कोऽस्यार्थः ? आर्याणामेतानि सत्यानि, तस्मादार्यसत्यानीति सूत्र एवोक्तम् (वसुबन्धुः, १९९८ : पृ.६८७)।

अत्र जिज्ञासोदेति यद्यार्याणामेव सत्यानीमानि तर्ह्यार्येतरजनानाङ्कृते सत्यान्येतानि मिथ्यारूपाणि ? तत्र वसुबन्धुना यथोक्तम्— किमन्येषामेतानि मृषा ? सर्वेषामेतानि सत्यानि, अविपरीतत्वात्। आर्यैस्तु यथैतानि तथा दृष्टानि, नान्यैः। अत आर्याणामेतानि सत्यान्युच्यन्ते, न त्वनार्याणाम्, विपरीतदर्शनात्।

यदार्याः सुखतः प्राहुस्तत् परे दुःखतो विदुः।

यत् परे सुखतः प्राहुस्तदार्या दुःखतो विदुः॥ (वसुबन्धुः, १९९८ : पृ.६८८ )

अर्थात् समेषामेव सत्यान्येतानि, अविपरीतत्वात्, यद्यप्यार्यजना यथैतानि जानन्ति न तथा साधारणजनाः, तेषां ज्ञानस्य विपर्ययत्वात्। ते तु दुःखमदुःखत इत्येवमादिभिराकारैः पश्यन्ति। तथापि सर्वदा विकारापोढत्वेन स्थितत्वात् समेषां हीमानि सत्यानि।

### दुःखस्यार्यसत्यत्वम्

बुद्धोपदिष्टेषु चतुर्षु सत्येषु दुःखं तावदस्ति प्रथममार्यसत्यम्। बुद्धनये जगदिदं दुःखमयं वर्तते। सर्वजनानुभवजन्यं दुःखमेव विराजतेऽत्र। सर्वेऽपि जागतिकाः पदार्था अनित्याः क्षणभङ्गुरा विनाशशीलाश्च वेविद्यन्ते। सांसारिकं सुखमपि वस्तुतो दुःखमेवास्ति। अत एव संसारस्था जनाः सर्वेऽपि सन्तप्ताः सन्त्येव। यच्च सर्वानुभवसिद्धमेवास्ति। महावग्गपालि इत्याख्ये दुःखस्वरूपं यथोल्लिखितं वर्तते— इदं खो पन, भिक्खवे, दुःखं अरियसच्चं। जाति पि दुक्खा,

जरा पि दुक्खा, व्याधि पि दुक्खो, मरणं पि दुक्खं, अप्पियेहि सम्पयोगो दुक्खो, पियेहि विप्पयोगो दुक्खो, यं पिच्छं न लभति तं पि दुक्खं। सङ्खित्तेन, पञ्चुपादानक्खन्धा दुक्खा (द्वारिकादासः,१९९८ : पृ.१८)। अस्यायं भावः– जन्मापि दुःखम्, जरापि दुःखम्, व्याधिरपि दुःखम्, मरणमपि दुःखम्, अप्रियसंयोगोऽपि दुःखम्, प्रियवियोगोऽपि दुःखम्, प्रियवस्तुनोऽप्रापणमपि दुःखम्, संक्षेपेण रूपादिस्कन्धपञ्चकमपि दुःखमेवास्ति। अश्वघोषोऽपि तथैव कथयति। अपि च—

बाधात्मकं दुःखमिदं प्रसक्तम्। (सौन्द.म.१६।४)

अर्थादस्मिँल्लोके वेदनात्मकं दुःखमिदं निरन्तरं विद्यते हि। तच्चापि दुःखं त्रिविधम्। तथा च— तिस्रो हि दुःखताः – दुःखदुःखता, विपरिणामदुःखता, संस्कारदुःखता च (वसुबन्धुः,१९९८ : पृ.६८८)। अर्थाद् दुःखस्यास्य दुःखदुःखपरिणामदुःखसंस्कारदुःखभेदेन त्रिविधं स्वरूपं विद्यते। तत्र याश्च शारीरिक्यः शिरोवेदनादयो मानसिक्यश्च स्थूलरूपेण दुःखतयानुभूयन्ते तास्तु दुःखदुःखम्। पुनश्च ये केचिद् भोजनपानशीतोष्णादयः सुखतयानुभूयमाना अपि दुःखहेतवः सम्पद्यन्ते ते हि परिणामदुःखम्। दुःखात्मकाः सर्वे धर्मा एवेति संस्कारदुःखम्, अनित्यत्वात् प्रतिकूलत्वाच्च। बाधनात्मकत्वं प्रतिकूलत्वञ्च सामान्यतो दुःखलक्षणमस्ति। किञ्च मोहाद् बालपृथग्जना आवीचिकेष्वपि स्कन्धेषु न तथा दुःखबुद्धिमुत्पादयन्ति, यथा आर्या दिव्यसुखेष्वपि। संस्कारदुःखैकरसत्वादार्यजनाः सर्वधर्मान् दुःखतः पश्यन्ति। विषयेऽस्मिन् यथोल्लिखितमस्ति—

ऊर्णापक्ष्म यथैव हि करतलसंस्थं न वेद्यते पुम्भिः।
अक्षिगतं तु तथैव हि जनयत्यरतिं च पीडां च॥
करतलसदृशो बालो न वेति संस्कारदुःखतापक्ष्म।
अक्षिसदृशस्तु विद्वांस्तेनैवोद्वेज्यते गाढम्॥ ( वसुबन्धुः,१९९८ : पृ.६८९ उद्धृतम् )

सर्वे संस्काराः संस्कारदुःखतया दुःखाः सन्ति। आर्यजना एव तान् तथा पश्यन्ति। तस्मादार्यज्ञानदृष्ट्या दुःखमेवार्यसत्यम्, न सुखम्, अनित्यतया प्रतिकूलत्वात्। संस्कारदुःखमिदमभिसन्धायैव तथागतेन दुःखमार्यसत्यं समुपदिष्टम्। सन्दर्भेऽस्मिन् वार्तिकालङ्कारकार एवमाह—

दुःखं संसारिणः स्कन्धाः ...। (प्र.वा. १।१४९)

अस्याशयोऽस्ति यो ह्युपादानस्कन्धानां प्रवाहस्तावदहन्त्वममत्वदृष्टेरालम्बनं भवति, यो ह्यात्मदृष्टेरधिष्ठानं स एव संस्कारदुःखतारूपम्। प्रसङ्गेऽस्मिन् धर्मकीर्तिनैवं प्रोक्तम्—

संस्कारदुःखतां मत्वा कथिता दुःखभावना। ( प्र.वा. १।२५४)

अस्येदं तात्पर्यम्– संस्कारादयोऽपि यदैव ज्ञानेन विषयीक्रियन्ते, तदैव विक्रियामापद्यमाना ध्रुवं दुःखदोर्मनस्यादीन्युत्पाद–यन्ति। अतश्च संस्कारदुःखमेवार्यसत्यमित्यभिहितम्। इदं हि दुःखं समस्तसास्रवधर्मान् परिव्याप्याविच्छिन्नतया यावत् संसारं प्रवर्तत एव। सामान्यतो दुःखसत्यस्य चत्वार आकारा भवन्ति– अनित्यता, दुःखता, शून्यता, अनात्मता चेति। अत्र धर्मकीर्तिरेवमाह—

कदाचिदुपलम्भात् तदध्रुवं दोषनिश्रयात्॥

दुःखं हेतुवशत्वाच्च न चात्मा नाप्यधिष्ठितम्।
नाकारणमधिष्ठाता नित्यं वा कारणं कथम्॥
तस्मादनेकमेकस्माद् भिन्नकालं न ज्ञायते। (प्र.वा. १।१७८–१८० )

अर्थादनित्यतो दुःखतः शून्यतोऽनात्मतश्चेति चतुराकारं दुःखसत्यम्। तत्कदाचिदुपलभ्यमानतयाऽनित्यम्। हेतुप्रतिबन्धाच्च दुःखम्, सर्वं परवशं दुःखमिति न्यायात्। दुःखात्मकाः पञ्चस्कन्धा वस्तुतोऽधिष्ठातुः कस्माच्चित् स्वतन्त्र–नित्य–कूटस्थपुद्गलाच्छून्या इत्येवात्र शून्यतायास्तात्पर्यम्। दुःखमिदमात्मापोढमस्ति, यतो हि नास्य काचिदधिष्ठाता प्रतीयते।

## समुदय आर्यसत्यम्

दुःखसमुदयोऽस्ति द्वितीयमार्यसत्यम्। समुदयस्यार्थोऽस्ति कारणम्। विषयेऽस्मिन् स्फुटार्थाकार एवमाह— समुदेत्यस्मात् दुःखमिति समुदय इति। हेतुभूताः स्कन्धाः समुदयः (वसुबन्धुः,१९९८ : पृ.२४)। अस्येदं तात्पर्यम्– समुदेति दुःखमस्मादिति समुदयः। समिति सम्यक् पूर्णतया वा। उदय इत्युत्पादः। हेतुप्रत्ययानां समग्रतया कार्यस्य सर्वाङ्गीणः समुत्पादः समुदयः प्रोच्यते। कारण–हेतु–प्रत्यय–निदानादिपर्यायेषु सत्स्वपि समुदयशब्दस्य प्रयोगः सकलदुःखस्य हेतुत्वमभिलक्ष्यैव तथागतेन विहितः। यद्यपि भवन्ति संस्काराः सर्वे समुदयशब्दस्य वाच्याः, परञ्चार्यसत्यानां निरूपणावसरे दुःखार्यसत्यस्यैव हेतवः प्राधान्येन समुदयशब्दस्य वाच्याः सन्ति। सन्दर्भेऽस्मिन् स्वोपज्ञभाष्ये यथोल्लिखितमस्ति— का पुनरुत्पत्तिः ? का चाभिनिर्वृत्तिः ? धातुगतियोन्यादिप्रकारभेदेनात्मभावस्योपपादनमुपपत्तिः। अभेदेन पुनर्भवप्रतिसन्धानमभिनिर्वृत्तिः। तयोर्यथाक्रमं कर्म च भवतृष्णा च हेतुः। तद्यथा बीजं शालियवादिजातिप्रकारभेदेनाङ्कुरकोपपादनस्य हेतुः। आपः पुनरभेदेन सर्वाङ्कुरप्ररोहमात्रस्येत्येव दृष्टान्तः (वसुबन्धुः,१९९८ : पृ.६९८)। अयमाशयः— क्लेशास्तु समुदयशब्दबोध्याः सन्ति। यतो ह्येभिरेवाशेषं दुःखमुत्पद्यते। तत्र कर्माण्येव भाविनो दुःखस्योपपत्तये बीजवदुपादानकारणम्, क्लेशाश्च सहकारिकारणमिति। तत्र द्वादशाङ्गे प्रतीत्यसमुत्पादे यच्च द्वितीयं संस्काराख्यं दशमञ्च भवाख्यमङ्गम्, तदेवाङ्गद्वयं कर्मस्वरूपं भवति। तत्र प्रत्युत्पन्नभवोपपत्तये पूर्वकृतानि कर्माणि संस्काराः, अनागतभवोपपत्तये च क्रियमाणानि कर्माणीह भव इत्यभिधीयते। अत्र वैभाषिकाणां मतन्तु नूनमेव विचारणीयमस्ति। ते तु सर्वं सास्रवं वस्तु समुदय इति निरूपयन्ति। तेषां मते दुःखसमुदयसत्ययोर्भेदः कार्यकारणतामुपादाय प्रवर्तते। तथा च— कर्म च तृष्णा च अथोऽविद्या संस्काराणां हेतुरभिसम्पराये (वसुबन्धुः,१९९८ : पृ.६९८)। अर्थाद्धेतुभूताः स्कन्धाः समुदयसत्यम्, कार्यभूताश्च दुःखसत्यमित्याशयः। संक्षेपतः सर्वे सास्रवाः कारणदृष्ट्या समुदयसत्यम्, कार्यदृष्ट्या च दुःखसत्यम्। अर्हतां च्युतिकाले ये पञ्चस्कन्धास्ते केवलं दुःखसत्यम्, यतो हि तेभ्य उत्तरकालं कार्यरूपेण स्कन्धा नोत्प–द्यन्ते। अतस्ते न कस्यापि कारणमिति नास्ति तेषां समुदयसत्यत्वम्। किञ्च सौत्रान्तिकेभ्य आभिधार्मिकाणामेतन्मतं सुतरां नाभिरोचते। तेषां मतानुसारेण दुःखसमुदयसत्ययोः समानाधिकरण्यं सर्वथा न समीचीनम्। सर्वे सास्रवा दुःखसत्यमिति युक्तम्, किन्तु तेषां समुदयसत्यत्वे सूत्रविरोधः। अत्र सूत्रकार एवमाह– समुदयसत्यं कतमत् ? याऽसौ नान्दीरागसहगता तत्र

तत्राभिनन्दिनीति (वसुबन्धुः,१९९८ : पृ.६९७)। अर्थान्नन्दीरागसहगता तृष्णैव समुदयसत्यमिति। यतो हि तृष्णासम्प्रयुक्ताः क्लेशाः कर्माण्येव च दुःखोत्पादसमर्थानि भवन्ति, नान्यथा। यद्येवं न स्यात्तदा चरमभविकानामर्हतामपि सन्ततेर्दुःखोत्पादः स्यात्। न च भवत्यतस्तृष्णैव समुदयसत्यमिति। सन्दर्भेऽस्मिन् महायानसूत्रसङ्ग्रहोऽपि तथैव समर्थयति— तत्र दुःखसमुदयमार्यसत्यं कतमत् ? तद्यथा येयं तृष्णा पौनर्भविकी नन्दीरागसहगता तत्र तत्राभिनन्दिनी, इदमुच्यते दुःखसमुदयमार्यसत्यम् ( शर्मा, १९६१ : पृ.१४)। विषयेऽस्मिन् यदाह अश्वघोषः–

दुःखस्य हेतुः प्रभवात्मकोऽयम् ( सौन्द.म.१६।४)।

अर्थादयं हेतुः पीडाया उत्पत्तेः कारणमस्ति। तृष्णासम्प्रयुक्ताः पञ्चस्कन्धा एव समुदयसत्यम्, न तु सर्वे सास्रवाः स्कन्धा इति सौत्रान्तिकानामाशयः। परवर्तिभिः सौत्रान्तिकैर्यद्यपि पूर्ववर्तिनामाचार्याणामुपर्युक्तं मतं न प्रतिक्षिप्तम्, परन्तु तृष्णैव केवलं समुदयसत्यमिति स्वमतं युक्त्या प्रतिष्ठापितम्। अवसरेऽस्मिन्नेवं प्रोक्तं धर्मकीर्तिना–

कारणत्वेऽपि नोदितम्।<br>
अज्ञानम्, उक्ता तृष्णैव सन्तानप्रेरणाद् भवे॥<br>
आनन्तर्याच्च कर्मापि सति तस्मिन्नसम्भवात्।<br>
तदनात्यन्तिकं हेतोः प्रतिबन्धादिसम्भवात्॥ (प्र.वा.१।१९१–१९२) अपि च<br>
सर्वत्र चात्मस्नेहस्य हेतुत्वात् सम्प्रवर्तते।<br>
असुखे सुखसंज्ञस्य तस्मात् तृष्णा भवाश्रयः॥ ( प्र.वा.१।१८७–१८८)

एतेषां श्लोकानां सारतो विज्ञायते तृष्णैव समुदयसत्यमिति। जन्मादिमूलानामविद्यादीनां सत्त्वेऽपि धर्मकीर्तिस्तृष्णामेव संसारस्यादिकारणं मन्यते। मोहापरसंज्ञाया अविद्याया जन्मनिमित्तस्य कर्मणश्चापि हेतुत्वे काम–रूप–अरूपभवेषु पञ्चस्कन्धसन्ततेः प्रेरणादव्यवहितकारणत्वाच्च तृष्णैव संसारकारणमिति धर्मकीर्तिसम्मतं विचारितमत्र।

दुःखसमुदयसत्यस्वरूपं महावग्गपालिग्रन्थे यथोल्लिखितमस्ति— इदं खो पन, भिक्खवे, दुःखसमुदयं अरियसच्चं — यायं तण्हा पोनोब्भविका नन्दिरागसहगता तत्र तत्राभिनन्दिनी, सेय्यथीदं कामतण्हा, भवतण्हा, विभवतण्हा (द्वारिकादासः,१९९८ : पृ.१८)। अर्थाद् या तृष्णा पौनर्भविकी नन्दीरागसहगता तत्रतत्राभिनन्दिनी सैव दुःखसमुदय– मार्यसत्यमुच्यते। सा च तृष्णा त्रिविधा– कामतृष्णा, भवतृष्णा, विभवतृष्णा। तत्र पञ्चकामगुणिको रागः कामतृष्णोच्यते। एवमेव रूपभूमिगतान् सुखगुणादीन् प्रार्थयमाणो रूपरागो भवतृष्णा प्रोच्यते। तथैवारूपभूमिप्रभवसुखादीन् गर्धमानोऽरूपरागो विभवतृष्णा निरुच्यते। एभिर्विवेचनैर्विज्ञायते यत् समेषां क्लेशानां मूलं तृष्णैवास्ति।

## निरोध आर्यसत्यम्

इतः पूर्वं समुदयसत्यं निरूपितम्। साम्प्रतं रोधाख्यमार्यसत्यमुपवर्णयितुमुपक्रम्यते। निरुद्धिर्निरोधः। निरोधो निर्वाणमिति पर्यायौ (त्रिपाठी, १९९० : पृ.१७१)। समेषां बौद्धसम्प्रदायानां निर्वाणमेवैकमात्रं लक्ष्यम्। अत एवास्य

सर्वेषु बौद्धनिकायेषु महती प्रतिष्ठा दरीदृश्यते। निर्वाणार्थमेव कुलपुत्रो गृहं त्यक्त्वा वनं गच्छति, दुष्करं तपस्तपति। प्राप्ते निर्वाणे सर्वं प्राप्नोति स इत्येवं बौद्धदार्शनिका आमनन्ति। इदमेव धर्मविनययोः सारतत्त्वम्। यथा सर्वाभ्यो दिग्भ्यः प्रवहन्तीनां सरितां प्रवाहः सागरोन्मुखो भवति तथैव बुद्धस्य सकलोपदेशो निर्वाणोन्मुखोऽस्ति। तस्मादस्य निर्वाणतत्त्वस्य निरूपणं समेषु बौद्धसिद्धान्तप्रकाशकेषु ग्रन्थरत्नेषूपलभ्यते। अतः सकलबौद्धसम्प्रदायप्रसिद्धमिदं निर्वाणं नूनमेव मानवजीवनोपयोगि वर्तते। यद्यपि निर्वाणस्वरूपविषये बौद्धा वैमत्यं भजन्ते, तथापि परवर्तिभिः स्थविरवादिसौत्रान्तिकादिबौद्धदार्शनिकैः सुविचार्य यन्निर्वाणस्वरूपं निर्धारितं तदिह प्रस्तूयते। दुःखनिरोधविषये महायानसूत्रसङ्ग्रहे यथोल्लिखितं वर्तते— तत्र कतमद् दुःखनिरोध आर्यसत्यम् ? यदस्या एव तृष्णायाः पौनर्भविक्या नन्दीरागसहगतायास्तत्रतत्राभिनन्दिन्या अशेषतः प्रहाणं प्रतिनिःसर्गो व्ययीभावः क्षयो विरागो निरोधो व्युपसमोऽस्तङ्गम इदमुच्यते दुःखनिरोध आर्यसत्यम् (शर्मा, १९६१ : पृ. ३१४)। सन्दर्भेऽस्मिन् महावग्गपालिग्रन्थ एवमुल्लिखितमस्ति– इदं खो पन, भिक्खवे, दुःक्खनिरोधं अरिसच्चं— यो तस्सा येव तण्हाय असेसविरागनिरोधो, चागो, पटिनिस्सग्गो, मुत्ति, अनालयो (द्वारिकादासः,१९९८ : पृ. १८)। अस्येदं तात्पर्यम्– भिक्षव एतन्निरोध आर्यसत्यमस्ति, यच्च तृष्णायाः प्रहाणादेव जायते। स्थविरवादिनां मतानुसारेण निर्वाणं तावत् परमार्थतो विद्यमानो धर्मोऽस्ति (त्रिपाठी, १९९० : पृ.१७१)। न हि केवलं दुःखनिरोधमात्रमभावमात्रं क्लेशक्षयमात्रं वा निर्वाणम्, यद्येवं तदा तन्न किञ्चित् स्यात्। तथागतेन तु निरोधस्तृतीयमार्यसत्यं समुपदिष्टम्। तत्तु चतुर्भिर्मार्गज्ञानैः साक्षात्क्रियते। नासद्भूतो धर्मः केनापि साक्षात्क्रियते। अत एव निर्वाणं तावत् प्रत्यक्षानुभूतं तत्त्वम्, न ह्यसन्मात्रम्। निर्वाणविषये ह्येवं समुल्लिखितं वर्तते–

यस्स चाधिगमा सब्बकिलेसानं खयो भवे।
निब्बानमिति निद्दिट्ठं निब्बानकुशलेन तं॥ (त्रिपाठी, १९९० : पृ. १७२ उद्धृतम्)

अनेनेदं विज्ञायते– क्लेशक्षय एव निर्वाणं नापि तु यस्याधिगमेन क्लेशक्षयो भवति, तन्निर्वाणम्। तत्तु शान्तिलक्षणम्, अच्युतिरसम्, अनिमित्तताप्रत्युपस्थानं निष्प्रपञ्चताप्रत्युपस्थानं वेति प्रतिपादनम्। तन्न साङ्ख्यानां प्रकृतिरिव तैर्थिकानामात्मवद् वाऽसिद्धम्, न च शशविषाणवदत्यन्तासद्भूतं प्रज्ञप्तिमात्रं वापि तु मार्गलभ्यमानत्वादप्रभम्, उत्पादभङ्गरहितत्वादजरामरणम्, नित्यम्, रूपस्वभावविगतत्वादरूपम्, सर्वप्रपञ्चातीतत्वाच्च निष्प्रपञ्चमित्यभिधीयते।

निर्वाणविषयेऽनुरुद्धेनेदं प्रोक्तम्— वानतो निक्खन्तं'ति निब्बानं। (अनुरुद्ध, १९६७ : पृ.२० )

अस्यायं भावः— वाननामिकायास्तृष्णाया निर्गतमिदम्,तस्मादिदं निर्वाणमुच्यते। यल्लौकिकचित्तचैतसिकानामिव तृष्णाया आलम्बनं न भवति तदेव निर्वाणम्। नित्याविकृतस्वलक्षणात् तत्प्राप्तानाञ्चात्यन्तधारणे निर्वाणं पारमार्थिको धर्मः। गुणकल्पनया तु प्रत्येकबुद्धबोधिसत्त्वसन्तानिको मार्गोऽस्ति। सन्दर्भेऽस्मिन् बर्मिभाषाटीकाकारेणेदं प्रोक्तम्—

सन्ति लक्खणमच्युतरसं निब्बानं अमतं।
*अनिमित्तउपट्ठानं न लब्भति॥* (अनुरुद्ध, १९६७ : पृ.२१ उद्धृतम् )

अस्यायं भावः– अमृतमच्युतपदं शान्तस्वरूपं चास्ति निर्वाणम्। नेदं प्रत्युपस्थानं पदस्थानमनिमित्तं वा वर्तते। निर्वाणनामकोऽमृतधर्मः शान्तस्वभावः सुखप्रदायकश्चास्ति। स्वस्वरूपान्न च्युतोऽयं धर्मः, तस्मादयमच्युतोऽभिधीयते। योगिज्ञानेनापि तन्निमित्तं नोपलभ्यते। अत एवानिमित्तमेव तस्य प्रत्युपस्थानम्। एवमेव नामरूपादिधर्माणां निरोधः खलु निर्वाणमुच्यते।

अट्ठशालिनीग्रन्थोऽपि तथैव समर्थयति। तथा च – नत्थि एत्थ तण्हासङ्खात वानं निग्गतं वा तस्मा वाना' ति निब्बानं ( अट्ठशालिनी,१९४२ : पृ. ३३२) । अस्येदं तात्पर्यम्– तृष्णायाः समुदायाद् विनिर्मुक्तमिदम्, अत एवेदं निर्वाणं निरुच्यते।

निर्वाणस्वरूपं रतनसूत्तग्रन्थे यथोल्लिखितमस्ति—

खयं विरागं अमतं पणीतं, यदज्झगा सक्यमुनी समाहितो।

नतेन धम्मेन समत्थि किञ्चि, इदं पि धम्मे रतनं पणीतं॥ (द्वारिकादासः,२००५ : पृ.४३)

अर्थान्निर्वाणं तावदच्युतस्वरूपं सर्वधर्मातीतं परमं सुखञ्चास्ति।

तथैव उदानग्रन्थे बुद्धेनेत्थं प्रोक्तम्– यस्मा च खो भिक्खभे' अत्थि अजातं अमतं अकतं असंखतं तस्म जातस्य मतस्य कतस्स संखतस्स निस्सरणं पञ्ञाय (द्वारिकादासः,२००५ : पृ. ६३)। अस्येदं तात्पर्यम्– निर्वाणन्त्वजातरूप–ममृतमकृतमसंस्कृतं तत्त्वञ्चास्ति। निर्वाणविषये धम्मपद इत्याख्ये ग्रन्थे यथोल्लिखितं वर्तते– निब्बानं परम सुक्खं (अवधकिशोर,१९४६ : पृ. ८५)।

अर्थान्निर्वाणं तावत् सर्वोत्तमं सुखञ्चास्ति। पुनरपि तत्रैव ह्येवमुल्लिखितमस्ति– छेत्वा रागञ्च दोषञ्च ततो निब्बाणमोहिसि (अवधकिशोर,१९४६ : पृ.१५१)। अर्थान्निर्वाणार्थिभिर्रागद्वेषक्षयादेव निर्वाणमधिगम्यते। एवमेव रागद्वेषादिसर्वक्लेशानां सर्वथा निरोध एव निर्वाणमित्यस्याशयः। पुनश्च तत्रैवेत्थमुपवर्णितमस्ति– अधिगच्छे पदं सन्तं सङ्खारूपसमं सुखं (अवधकिशोर,१९४६ : पृ.१५५)। अर्थाद् बुद्धशासने प्रसन्नः प्रामोद्यबहुलो भिक्षुः संस्कारोपशमं सुखमयं शान्तं निर्वाणपदमधिगच्छति। पुनरपि तत्रैव यथोल्लिखितमस्ति– फुसन्ति धीरा निब्बाणं योगक्खेमं अनुत्तरं (अवधकिशोर,१९४६ : पृ.१०)। अर्थान्निर्वाणं तावद् योगक्षेममनुत्तरमस्ति।

बुद्धोपदेशं समाश्रित्यैव भदन्तनागसेनः सुमनोहरोपमासाहाय्येन यवनाधिपतिं मिलिन्दं निर्वाणतत्त्वमित्थं बुबोध— राजा आह– भन्ते नागसेन निरोधो निब्बानं'ति। आम महाराज निरोधो निब्बानं'ति। कथं भन्ते नागसेन निरोधो निब्बानं–'ति। सब्बे बालपृथुज्जना खो महाराज अज्झत्तिकबाहिरे आयतने अभिनन्दन्ति, अभिवदन्ति, अज्झोसाय तिष्ठन्ति, ते तेन सोतेन बुय्हन्ति, न परिमुच्चन्ति जातिया जरामरणेन परिदेवेन दुक्खेहि दोमनस्सेहि उपायासेहि। न परिमुच्चन्ति...। एवं खो महाराज निरोधो निब्बानं 'ति ( आर डी वाडेकर,१९४० : पृ. ७२)। संवादस्यास्य सारांशोऽस्ति तत्र प्रथमं तावद् यवनाधिराजो नागसेनं पप्रच्छ– भद्र किं निरोध एव निर्वाणम् ? तत्र नागसेनेन प्रोक्तम्— आम् महाराज, निरोध एव निर्वाणम्। अनन्तरं राजा मिलिन्दो नागसेनं प्रत्युवाच– भद्र कथं निरोध एव निर्वाणम् ? तदनु नागसेनो जगाद— महाराज जागतिकाः सर्वेऽज्ञानिनो जीवा विषयोपभोगे मग्ना भवन्ति, तत्रैव रमन्ते, तत्रैवानन्दमनुभवन्ति। ते तु भवसागरेऽस्मिन् भूयो भूयो जायन्ते, रोगशोकादिजागतिकदुःखानि प्राप्य म्रियन्ते च। किञ्च

ज्ञानिन आर्यश्रावकाः खलु विषयेन्द्रियोपभोगे मग्ना न भवन्ति, न हि रमन्ते तत्र ते। ते तु जागतिकान् सर्वान् सुखान् परित्यज्य परमार्थचिन्तने मग्ना भवन्ति। अतस्तेषां तृष्णाया निरोधो जायते। तृष्णानिरोधादुपादाननिरोधः, उपादाननिरोधाद् भवनिरोधः, भवनिरोधाज्जन्मनिरोधो भवति। जन्मनिरोधात् सुखदुःखातीतो भवत्येव जीवः। अनया रीत्या निरोध एव निर्वाणमिति निश्चप्रचम्।

वैभाषिकाणां मतेन विरागधातुः प्रहाणधातुर्निरोधधातुश्च निर्वाणम् (वसुबन्धुः,१९९८ : पृ.८०६)। तच्चासंस्कृतं कुशलं विसंयोगद्रव्यञ्च। निरोधो निर्वाणमिति पर्यायौ। निरोधविषये यथोक्तं वसुबन्धुना—

आकाशं द्वौ निरोधौ च तत्राकाशमनावृतिः।
प्रतिसङ्ख्यानिरोधो यो विसंयोगः पृथक् पृथक्।
उत्पादात्यन्तविघ्नोऽन्यो निरोधोऽप्रतिसङ्ख्यया॥ ( अभि. को. १।५–६)

अर्थान्निरोधस्तावद् द्विविधः। एकः प्रतिसङ्ख्यानिरोधोऽपरश्चाप्रतिसङ्ख्यानिरोधः। तत्र यः सास्रवैर्धर्मैर्विसंयोगः स एव प्रतिसङ्ख्यानिरोधः प्रोच्यते। दुःखादीनामार्यसत्यानां प्रति प्रतिसङ्ख्यानं प्रज्ञाविशेषः, तेन प्रज्ञाविशेषेण प्राप्यो निरोधः प्रतिसङ्ख्यानिरोधोऽभिधीयते। द्रव्यसन् प्रतिसङ्ख्यानिरोधः, सत्यचतुष्टयनिर्देशनिर्दिष्टत्वात्, मार्गसत्यवदिति वैभाषिका अभ्युपगच्छन्ति। असभागश्चायं निरोधः, यतो हि नास्य कश्चित् सभागहेतुः, नासौ च कश्चिद् धर्मस्य सभागहेतुः। अत एव नित्यश्चायं प्रतिसङ्ख्यानिरोधः। पुनश्च नायं निरोध एक एवापि तु यावन्ति क्लेशाख्यानि संयोगद्रव्याणि तावन्ति एव निरोधाख्यानि विसंयोगद्रव्याणि। अनागतानां धर्माणामुत्पादस्यात्यन्तं विघ्नभूतो विसंयोगाद् योऽन्यो निरोधः सोऽप्रतिसङ्ख्यानिरोधो निगद्यते। न ह्यसौ प्रतिसङ्ख्यया लभ्यते, प्रत्ययवैकल्यात्। निर्वाणविषयेऽश्वघोष एवमाह—

दीपो यथा निर्वृतिमभ्युपेतो नैवावनिं गच्छति नान्तरिक्षम्।
दिशं न काञ्चिद्विदिशं न काञ्चित् स्नेहक्षयात् केवलमेति शान्तिम्॥
एवं कृती निर्वृतिमभ्युपेतो नैवावनिं गच्छति नान्तरिक्षम्।
दिशं न काञ्चिद्विदिशं न काञ्चित् क्लेशक्षयात् केवलमेति शान्तिम्॥ (सौन्दर.म.१६।२८–२९)

उपर्युक्तस्य श्लोकद्वयस्येदं तात्पर्यम्— येन प्रकारेण निर्वापितं प्राप्तो दीपको न हि भूमिं गच्छति, न त्वाकाशम्, न हि काञ्चिद् आशाम्, न काञ्चिदुपदिशम्, तैलक्षयात् केवलं निर्वापनं प्राप्नोति, तेनैव प्रकारेण तृष्णाक्षयः प्राप्तो धर्मात्मा नैव पृथ्वीं गच्छति, न ह्याकाशम्, न काञ्चिद् दिशम्, न काञ्चिदुपदिशं प्रत्युत दुःखविनाशात् केवलं शान्तिं प्राप्नोति। पुनश्चाश्वघोषेणैवं प्रोक्तम्—

दुःखक्षयो हेतुपरिक्षयाच्च शान्तं शिवं साक्षिकुरुष्व धर्मम्।
तृष्णाविरागं लयनं निरोधं सनातनं त्राणमहार्यमार्यम्॥ ((सौन्दर.म.१६।२६)

अस्यायं भावः— कारणनाशाद् दुःखनाशो भवति। अतस्तृष्णानिवारकं शान्तं कल्याणप्रदं पुरातनं संरक्षकमविनाशिनं मान्यं धर्मं प्रत्यक्षदर्शनं कुरु। पुनरपि तत्रैवाश्वघोषः कथयति—

यस्मिन्न जातिर्न जरा न मृत्युर्न व्याधयो नाप्रियसम्प्रयोगः।

नेच्छाविपन्न प्रियविप्रयोगः क्षेमं पदं नैष्ठिकमच्युतं तत् ।। ((सौन्दर.म.१६।२७)

अस्येदं तात्पर्यम्— यस्मिन्न जननं न हि वार्द्धक्यं न तु मरणं न रोगा नानभिलषितप्राप्तिः, नेच्छाविघातोऽस्ति, प्रियविरहस्तन्माङ्गलिकं स्थानं नैष्ठिकं विनाशरहितं भवति। जन्ममरणादिरहितं सर्वप्रपञ्चातीतं शान्तस्वरूपं निर्वाणमित्यनेन प्रकटितं भवति। पुनश्चाश्वघोषेण निर्वाणतत्त्वमेवं प्रोक्तम्—

ध्यानप्रवर्तनाद्धर्माः प्राप्यन्ते यैरवाप्यते।

दुर्लभं शान्तमजरं पदं तदमृतं पदम् ।। (बु.च.१२।१०६)

अस्यायं भावः – ध्यानं सिद्धं भवति यदा तदा ध्यानिना तादृशो धर्मः प्राप्यते, येन दुर्लभं शान्तमजरं परमं पवित्रममृतं पदं लभ्यते। सर्वे जागतिकाः पदार्था अनित्या विनाशशीलाः सन्ति। अत एव मोक्षार्थिभिरमृतस्वरूपं निर्वाणतत्त्वं साक्षात्करणीयम्। अतीतमनागतमनाकाशं निर्वाणं पुद्गलश्चेति प्रज्ञप्तिमात्रमिति सौत्रान्तिकाः स्वीकुर्वन्ति ( आर्यदेवः,१९७१ : पृ. ४१)। तेषां मते हेतुप्रत्ययैर्जनितं संस्कृतमेव वस्तु , नासंस्कृतं निर्वाणम्। तत्तु केवलं क्लेशकर्मजन्मनां प्रवृत्तेर्निवृत्ति–मात्रम्। न ते संस्कृतं प्रत्याख्यान्ति, किन्तु न तल्लोकोत्तरं वस्तुसच्च, संस्कृतानामेव सत्त्वात्। अतोऽसद्भूतमभावमात्रं तावन्निर्वाणम्। सौत्रान्तिकनये चेतोविमुक्तिर्हि निर्वाणं प्रदीपनिर्वाणवदभावमात्रम्। यथोक्तमभिधर्मकोशभाष्यकारेण— प्रद्योतस्येव निर्वाणं विमोक्षस्तस्य चेतसः (वसुबन्धुः,१९९८ : पृ.२७)।

बौद्धवाङ्मयस्य प्रतिष्ठापीठस्य माध्यमिकदर्शनस्य प्रवर्तकाचार्येण नागार्जुनेन निर्वाणस्वरूपमाविष्कुर्वता यथोक्तम्—

अप्रहीणमसम्प्राप्तमनुच्छिन्नमशाश्वतम्।

अनिरुद्धमनुत्पन्नमेतन्निर्वाणमुच्यते ।। ( मा.का.२५।३ )

अर्थान्निर्वाणमिदं रागादिवन्न प्रहीयते, न हि श्रामण्यफलवत् प्राप्यते, न वा स्कन्धादिवदुच्छिद्यते, नेदं नित्यमशून्यवत्, नोत्पद्यते हीदम् , न वा निरुद्ध्यते खल्विदम्। एवमेव निरवशेषकल्पनाक्षयरूपमेव निर्वाणम्। एवमेव निर्वाणं तावत् सर्वप्रपञ्चोपशमं शिवं वर्तते। तथा च— सर्वप्रपञ्चोपशमशिवलक्षणं निर्वाणम् (शर्मा, १९६० : पृ.४)। चन्द्रकीर्तिरपि तथैव समर्थयति— इह हि सर्वेषां प्रपञ्चानां निमित्तानां या उपशमोऽप्रवृत्तिस्तन्निर्वाणम्, स एव चोपशमः प्रकृत्यैवोपशान्तित्वाच्छिवः। वाचामप्रवृत्तेर्वा प्रपञ्चोपशमश्चित्तस्याप्रवृत्तेः शिवः। यदा चैवं बुद्धाः सर्वप्रपञ्चोपशान्तरूपे निर्वाणे शिवेऽवस्थानयोगेन नभसीव हंसराजानः स्थिताः ( शर्मा, १९६० : पृ.२३८ )। नागार्जुनमते निर्वाणसंसारयोर—भेदोऽस्ति। तथा च—

निर्वाणस्य च या कोटिः कोटिः संसरणस्य च।

न तयोरन्तरं किञ्चित् सुसूक्ष्ममपि विद्यते ।। ( मा.का.२५।२०)

अस्येदं तात्पर्यम्– माध्यमिकमते निर्वाणं तावद् भावाभावादिव्यतिरिक्तमनिर्वचनीयं परमं तत्त्वं ह्युच्यते। यच्च भूतकोटिः, धर्मधातुरित्यनेन शब्देनापि निरुच्यते। एवमेव माध्यमिकाभिमतं निर्वाणतत्त्वं निरूपितम्। इदानिं योगाचाराभिमतं निर्वाणतत्त्वं निरूप्यते। योगाचाराणां निर्वाणविषकविचारोऽतीव सूक्ष्मो गभीरश्चास्ति। तथागतेन निर्वाणस्वरूपमित्थमुपदिष्टम्— विकल्पस्य मनोविज्ञानस्य व्यावृत्तिर्निर्वाणमित्युच्यते (शर्मा,१९६३ : पृ.१२६)।

अर्थान्मनोविज्ञानस्य विकल्पस्य निरोध एव निर्वाणमुच्यते। पुनरपि बुद्धेनेदं समुपदिष्टम्— सर्वविज्ञानस्वभाववासनालयमनो मनोविज्ञानदृष्टिवासना परावृत्तिर्निर्वाणमित्युच्यते (शर्मा,१९६३ : पृ.९८)। पुनश्च तत्रेवोल्लिखितमस्ति— विकल्पस्याप्रवृत्तिरनुत्पादो निर्वाणम् (शर्मा,१९६३ : पृ.२००)। सर्वविकल्पातीतमुत्पाद–विनिर्मुक्तं निर्वाणमित्याशयः। पुनश्च बुद्ध एवमाह—

तथताशून्यताकोटि निर्वाणं धर्मधातुकम्।
कायं मनोमयं चित्रं चित्तमात्रं वदाम्यहम्॥ (लङ्का.सू. ३।३१)

अर्थान्निर्वाणमिदं तथता–शून्यता–धर्मधातुरित्यादिनाम्नापि व्यवह्रियते। त्रिंशिकाविज्ञप्तिभाष्यस्य भाष्यकारः स्थिरमतिरेवमाह— तत्र संसारप्रवृत्तिर्निकायसभागान्तरेषु प्रतिसन्धिबन्धः। निवृत्तिः सोपधिशेषो निरुपधिशेषश्च निर्वाणधातुः (वसुबन्धुः,१९९२ : पृ.८४)। पुनश्च स्थिरमतिरेवमाह— क्लेशज्ञेयावरणप्रहाणमपि मोक्षसर्वज्ञत्वाधिगमार्थम्। क्लेशा हि मोक्षप्राप्तेरावरणम्। अतस्तेषु प्रहीणेषु मोक्षोऽधिगम्यते (वसुबन्धुः,१९९२ : पृ.८४)। अर्थात् क्लेशज्ञेयावरणं रहितं सांसारिकदुःखाद् विनिर्मुक्तमुपाधिविहीनञ्च निर्वाणमिति भाष्यकारस्याभिमतम्।

## मार्ग आर्यसत्यम्

येन गम्यते स मार्गः प्रोच्यते। मार्गः पन्था वा। अनेन च निर्वाणं प्राप्यते, अत एवासौ मार्गोऽभिधीयते। अथवा येन निर्वाणमन्विष्यते स मार्गः। मार्ग एव प्रतिपदित्युक्तः, यस्मादनेन निर्वाणं प्रतिपद्यते (त्रिपाठी,१९९० : पृ.१८०)। मार्गसत्यविषयेऽभिधर्मसमुच्चये यथोल्लिखितमस्ति– मार्गसत्यं कतमत् ? येन दुःखं परिजानीते, समुदयं प्रजहाति, निरोधं साक्षात्करोति,..( त्रिपाठी,१९९० : पृ.१८० उद्धृतम्)। अर्थाद् येन दुःखं ज्ञायते, दुःखसमुदयः क्षीयते, दुःखनिरोधः साक्षात्क्रियते स एव मार्गः कथ्यते। महावग्गपालिग्रन्थे यथोल्लिखितमस्ति– इदं खो पन, भिक्खवे, दुःखनिरोधगामिनी पटिपदा अरियसच्चं— अयमेव अरियो अट्ठङ्गिको मग्गो, सेय्यथीदं— सम्मादिट्ठि...(द्वारिकादास,१९९८ : पृ.१८)। अर्थादेतदेव दुःखनिरोधगामिनी प्रतिपद् आर्यसत्यम्, अयमेवाष्टाङ्गिको मार्गः। यथा– सम्यग्दृष्टिः, सम्यक् सङ्कल्पः, सम्यग् वाक्, सम्यक् कर्मान्तः, सम्यगाजीवः, सम्यग् व्यायामः, सम्यक् स्मृतिः, सम्यक् समाधिः। अष्टौ मार्गाङ्गानीमानि मार्गसत्यनाम्ना गीयन्ते। परमार्थत इमान्यष्टौ चैतसिका धर्माः प्रज्ञा–वितर्क–विरतित्रय–वीर्य–स्मृति–एकाग्रताख्याः प्रोच्य–न्ते। यदा चेमे चैत्तधर्माश्चतुर्भिर्मार्गचित्तैः सह सम्प्रयुज्यन्ते तदा मार्गसत्यमित्युच्यन्ते। यदा महाकुशलैर्महद्गतैर्वा सम्प्रयुज्यन्ते तदा यथायोगं शीलसमापत्तीत्यादिलौकिकमार्गा व्यपदिश्यन्ते। यदा च फलचित्तैः सह सम्प्रयुज्यन्ते तदा चतुःसत्यविनिर्मुक्ता एव (अनुरुद्ध, १९६७ : पृ.५०)।

सम्यग्दृष्टिरपि द्विविधा— लौकिकी लोकोत्तरा च (त्रिपाठी,१९९० : पृ.१८१)। सम्यक्समाधिः शमथः। लौकिकी प्रज्ञैव विपश्यना। तयोर्योगः शमथविपश्यनायुगनद्धमार्गः। युगनद्धमार्गभावनाबलेन लोकोत्तरप्रज्ञायाः प्रादुर्भावः। शेषाण्यङ्गानि शीलाख्यो मार्गः। अमलाऽनास्रवा लोकोत्तरा प्रज्ञैव मुख्यो मार्गः। तदुत्पादकत्वात् तदानुकूल्याच्चान्येऽपि मार्गा इत्यभिधीयन्ते। संक्षेपेण कथयितुं शक्यते यन्निरोधमार्ग एव निर्वाणप्राप्तिजनको मार्गः।

यानि तृष्णादीनि कारणानि दुःखं समुत्पादयन्ति, तेषां कारणानां सर्वक्लेशानामपि च विनाशोपायः खल्वार्याष्टाङ्गिको मार्ग एव। अनेनैव मार्गेण तृष्णा प्रहीयते, निर्वाणमधिगम्यत इति निश्चप्रचम्।

## निष्कर्षः

निष्कर्षतः कथयितुं शक्यते यद् बौद्धनये चराचरं जगत् सर्वं दुःखस्वरूपं किल। एतस्माद् सांसारिकदुःखाद् विमुक्तये तथागतेन सत्यचतुष्टयं समुपदिष्टम्। तत्र दुःखं सार्वत्रिकः क्लेशः। तस्य नैकं कारणमपि तु कारणश्रृङ्खलैवास्ति। सैव जातिजरामरणादिद्वादशनिदानानि कथ्यन्ते। तत्र तु पूर्वं प्रति परं कारणं भवति। तेन निखिलस्य दुःखपुञ्जस्य कारणमविद्या तृष्णैवास्ति। अविद्यावशङ्गतो हि जीवः संसारचक्रेऽहर्निशं भ्रमति, दुःखमाप्नोति च। तस्मादविद्यायाः प्रहाणमावश्यकम्। तृष्णाक्षयादेव निर्वाणतत्त्वमधिगम्यते, सुखं प्राप्यते, दुःखञ्चापहीयते। एतावता बौद्धानां सत्यचतुष्टयस्य सुविचारः समुचित एव प्रतिभाति।

## कृतज्ञताज्ञापनम्

प्रकृतलेखे बौद्धग्रन्थानामाधारेण सत्यचतुष्टयस्यानुसन्धानात्मकमध्ययनं विहितमस्ति। सम्पादनार्थमस्यालेखस्य गभीरमध्ययनं विधाय सूक्ष्मेक्षिकया सम्परीक्ष्य यथावश्यकं परामर्शदातृभ्यो विशेषज्ञेभ्यो हार्दं कार्तज्ञ्यं व्यनज्मि।

## सन्दर्भसूची

*अट्ठशालिनी*, ( ई.१९४२), पुना : भण्डारकर ओरियन्टलसीरीज।

अनुरुद्ध, (ई.१९६७), *अभिधम्मत्थसङ्गहो,* (हिन्दी अनुवाद सहित), पठमो भाग, वाराणसी :

वाराणसेयसंस्कृतविश्वविद्यालयः ।

अश्वघोषः, (ई.१९९१), *बुद्धचरितम्*, (प्रकाशहिन्दीव्याख्योपेतम्), (प्रथमो भागः), वाराणसी : चौखम्बा विद्याभवन।

——, ( ई.२०१०), *सौन्दरनन्दं* महाकाव्यम्, (विमला–संस्कृतहिन्दी–व्याख्योपेतम्), (व्या.का.जगदीशचन्द्रमिश्रः), वाराणसी : चौखम्बासुरभारतीप्रकाशनम्।

आर्यदेवः, ( ई.१९७१), *चतुःशतकम्*, (चन्द्रकीर्तिवृत्तिसहितम्), नागपुर : आलोक प्रकाशन।

धर्मकीर्तिः, (ई.१९९१), *प्रमाणवार्तिकम्*, (वार्तिकालङ्कारव्याख्योपेतवार्तिकालङ्कारभाष्यसहितम्), (वा.अ.का.

प्रज्ञाकरगुप्तः), प्रथमोभागः, (प्रका.योगीन्द्रानन्दः), वाराणसी : षड्दर्शन प्रकाशन।

*धम्मपद*, ( ई. १९४६), बनारस : महाबोधि सभा, सारनाथ।

नागार्जुनः, ( ई. १९६०), *मध्यमकशास्त्रम्*, (प्रसन्नपदव्याख्यया संवलितम्), दरभङ्गा : मिथिलाविद्यापीठम्।

बुद्धघोषः (ई.२००९.), *विशुद्धिमग्गो*, (हिन्दी अनुवाद सहित), (अनुवा.सम्पा. द्वारिकादास) वाराणसी : बौद्धभारती।

*महायानसूत्रसङ्ग्रहः*, (ई.१९६१), (सम्पा. परशुरामशर्मा), ( प्रथमो भागः), दरभङ्गा : मिथिलाविद्यापीठम्।

*महावग्गपाली,* (ई.१९९८), (हिन्दी अनुवाद सहित), (सम्पा.अनु. द्वारिकादास ), वाराणसी : बौद्धभारती।

*मिलिन्दपञ्हो*, ( ई.१९४०), बम्बई : बम्बई यूनिभर्सिटि ।

*लङ्कावतारसूत्रम्*, ( ई.१९६३), दरभङ्गा : मिथिलाविद्यापीठम्।

वसुबन्धुः, ( ई.१९९८), *अभिधर्मकोशः*,(स्वोपज्ञभाष्यसहितः), वाराणसी : बौद्धभारती।

——, ( ई.१९९२) *विज्ञप्तिमात्रतासिद्धि–प्रकरणद्वयम्*,(व्याख्यात्रयोपेतम्), (व्या.का. स्थिरमतिः), (प्रका.हरिश्चन्द्रमणित्रिपाठी), वाराणसी : सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः ।

*सुत्तनिपातपालि*, (ई.२००५), (हिन्दी अनुवाद सहित), (अनुवा.सम्पा. द्वारिकादास), वाराणसी : बौद्धभारती।

*सुत्तपिटक,* (ई.२०१०), (हिन्दी अनुवाद सहित), (अनुवा.सम्पा. द्वारिकादास), वाराणसी : बौद्धभारती।